पाठ-21

# भारतभूषा संस्कृतभाषा

भारतभूषा संस्कृतभाषा
विलसतु हृदये हृदये।
संस्कृतिरक्षा राष्ट्रसमृद्धिः
भवतु हि भारतदेशे।
श्रद्धा महती निष्ठा सुदृढा
स्यान्नः कार्यरतानां
स्वच्छा वृत्तिर्नव उत्साहो
यत्नो विना विरामम्।
न हि विच्छित्तिश्चित्तविकारः
पदं निधेयंस्ततम्
सत्यपि कष्टे विपदि कदापि
वयं न यामो विरतिम् ॥1॥

श्वासे श्वासे रोमसु धमनिषु
संस्कृतवीणाक्वणनम्
चेतो वाणी प्राणाः कायः
संस्कृतहिताय नियतम्।

श्वसिमि प्राणिमि संस्कृतवृद्धयै
नमामि संस्कृतवाणीम्
पुष्टिस्तुष्टिः संस्कृतवाक्तः
तस्मादृते न किञ्चित् ॥2॥

नाहं याचे हारं मानं
न चापि गौरववृद्धिम्
नो सत्कारं वित्तं पदवीं
भौतिकलाभं कञ्चित्।
यस्मिन् दिवसे संस्कृतभाषा
विलसेज्जगति समग्रे
भव्यं तन्महदद्भुतदृश्यं
काङ्क्षे वीक्षितुमाशु ॥3॥

## अभ्यासः

1. अस्य पाठस्य भावार्थं लिखत।
2. अस्मिन् पाठे कवेः का आकाङ्क्षा अस्ति?
3. आधुनिकभारते संस्कृतस्य कीदृशी स्थिति अस्ति?
4. संस्कृतस्य उन्नतिः केनोपायेन भविष्यतिं?